National Journal of Hindi & Sanskrit Research

National Journal of
Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2024; 1(57): 265-268
© 2024 NJHSR
www.sanskritarticle.com

नरसिंहगणेशभट्टः
शोधच्छात्रः, व्याकरणविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीराजीवगान्धीपरिसरः,
शृङ्गेरी

Correspondence:
नरसिंहगणेशभट्टः
शोधच्छात्रः, व्याकरणविभागः,
केन्द्रीयसंस्कृतविश्वविद्यालयः,
श्रीराजीवगान्धीपरिसरः,
शृङ्गेरी

प्रौढमनोरमा-शब्दरत्नदिशा "एत्येधत्यूठ्सु" इति सूत्रविमर्शः

नरसिंहगणेशभट्टः

शोधसारः – संस्कृतवाङ्मयजगति ऐन्द्रचान्द्रकाशकृत्स्नादिव्याकरणेषु विद्यमानेषु सत्सु रत्नस्वरूपेण शोशुभ्यते पाणिनीयम्। लौकिकवैदिकशब्दव्युत्पत्तिप्रतिपादनाच्च जगतीतले विशिष्टं स्थानं भजते। तपस्सन्तुष्टमहेश्वरप्रसादप्राप्ताक्षरसमाम्नायमाश्रित्यप्रणीताष्टाध्याय्यी अष्टसु अध्यायेषु विभक्ता सती संज्ञा, परिभाषादिभेदेन षोढा विभज्यते। उपचतुसहस्रं सूत्राण्यपि एतेषु षट्स्वेवान्तर्भवन्ति। उपचतुसहस्रसूत्रेष्वन्यतमं सूत्रं वरीवर्ति **"एत्येधत्यूठ्सु"**। षष्ठाध्यायस्य प्रथमे विद्यमानस्य सूत्रस्यास्य दलानां पाणीनीयव्याकरणस्य प्रक्रियाज्ञानस्य आधारस्तम्भभूतवैयाकरणसिद्धान्तकौमुद्याः व्याख्यानैः सह विमर्शनं नितान्तमौचित्याय कल्पत इति हेतोः प्रत्येकं दलस्य विवेचनपूर्वकं प्रयोजनोपन्यासः प्रकृतलेखे उपलक्ष्यते। विशिष्य प्रढमनोरमा-शब्दरत्नयोः मतभेदः कोटिक्रमेणोपन्यस्तो विद्यते। पूर्वपक्षसिद्धान्तरूपेण विषयोऽत्र निगदितः।

उपोद्घातः - धर्मार्थकाममोक्षाख्येषु चतुर्षु पुरुषार्थेषु मोक्षाख्यः पुरुषार्थ एव सर्वेषां प्राणिनां परमप्रयोजनं भवति, तत्प्राप्तये च वेद एव मुख्यतमं स्थानं भजते। तदुक्तञ्च

प्राप्त्युपायोऽनुकारश्च तस्य वेदो महर्षिभिः।
एकोऽप्यनेकवर्त्मेव समाम्नातः पृथक् पृथक्।।[1]

अधिगमाय च तादृशस्य वेदस्य षडङ्गानि भवन्ति ।

शिक्षा व्याकरणं छन्दो निरुक्तं ज्यौतिषं तथा।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः।।

षट्स्वङ्गेषु मुखमिव मुख्यस्थानत्त्वात् मुमुक्षार्थिभिः सर्वैः नूनमध्येयमेव। तदुक्तं पाणिनीयशिक्षायां **"तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते"** । वाक्यपदीयेऽपि

इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् ।
इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः।।[2] इति

भाष्यकारोप्याह – **"प्रधाने च कृतो यत्नः फलवान् भवति"**[3] । इदं च व्याकरणं न केवलं मोक्षसाधनमपि तु अन्येषां वेदाङ्गानामप्युपजीव्यं भवति। ऐन्द्रं-काशकृत्स्नं-चान्द्रमित्यादीनि बहूनि व्याकरणानि विश्वस्मिन् विश्वे समुपलभ्यन्ते तथापि तपस्सन्तुष्टमहेश्वरप्रसादप्राप्तत्त्वात् वैदिकलौकिकशब्दान्वाख्यानत्त्वाच्च पाणिनीयव्याकरणमेव वेदाङ्गत्त्वेन परिगण्यते। पाणिनि-कात्यायन-पतञ्जल्याख्यातैः त्रिभिर्मुनिभिः प्रणीतत्त्वात् त्रिमुनिव्याकरणमित्यपि कथ्यते।

तदेतस्मिन् पाणिनीये व्याकरणे उपचतुस्सहस्रसूत्राणि सन्ति । तानि सूत्राणि षोढा विभक्तुं शक्यानि

संज्ञा च परिभाषा च विधिर्नियम एव च।
अतिदेशोऽधिकारश्च षड्विधं सूत्रलक्षणम्।। इति।

भगवान् पाणिनिः लाघवेन शास्त्रप्रक्रियानिर्वाहाय कार्यार्थश्च संज्ञादीनि सूत्राणि रचयामस। तादृशसंज्ञासूत्रेष्वन्यतमं भवति प्रकृतसूत्रम्। तदेतत्सूत्रस्थदलानां विमर्शनं प्रकृतेऽस्मिन् लेखे विधास्यते।

कुञ्चिकापदानि – एति, एधति, ऊठ्।

तथ्यसङ्कलनम् –

सूत्रपरिचयः - एत्येधत्यूठ्सु इति हि सूत्रम्। एकपदात्मकमिदं सूत्रम्। आद्गुणः[4] इत्यस्मात् सूत्रात् आत् इति पदं, वृद्धिरेचि[5] इति संपूर्णं सूत्रमत्रानुवर्तते। एकः पूर्वपरयोः[6] इत्यधिकारे अस्तीदं सूत्रम्। वृद्ध्यादेशः विधीयते अनेन सूत्रेण। एतिश्च एधतिश्च ऊठ् च इत्येतेषां द्वन्द्वः एत्येधत्यूठः, तेषु एत्येधत्यूठ्सु इति

अत्र विग्रहः बोध्यः। एतिः इति इण्गतौ धातोः श्तिपा निर्देशः। एधतिः इति एधवृद्धौ धातोः श्तिपा निर्देशः। इक्श्तिपौ धातुनिर्देशे[7] इति वार्त्तिकेन धातौ वक्तव्ये श्तिप्प्रत्ययो भवति धातोः परत्र। तथा च एतिः इत्यनेन इण्गतौ धातुः, एधतिः इत्यनेन एधवृद्धौ धातुश्च बोध्यते। ऊठ् इति वाह ऊठ् इति सूत्रेण संप्रसारणसंज्ञकस्य ऊठः बोधकः। एचि इति यदनुवृत्तं तच्च एत्येधत्योरेव विशेषणम्, न तु ऊठः। विशेषणमिदम् एचि इति सप्तम्यन्तं वर्णात्मकञ्च। अतः अत्र तदन्तविधिं बाधित्वा यस्मिन् विधिस्तदादावल्ग्रहणे[8] इति परिभाषया तदादिविधिः। तेन एजादौ इण्गतौ धातौ परे, एजादौ एधवृद्धौ धातौ परे च इत्यर्थः सम्पद्यते। एवं च - अवर्णात् एजादौ इण् धातौ परे, एधधातौ परे, ऊठि च परे पूर्वपरयोः वृद्धिरेकादेशः स्यात् इति अस्य सूत्रस्यार्थः सम्पद्यते। **उदाहरणम् -** उप एति इत्यत्र अथवा उप एधते इत्यत्र वा अवर्णात् एजादिः इण्धातुः, एजादिः एधधातुश्च परत्र अस्ति इति कारणात् पूर्वपरयोः स्थाने वृद्धिरेकादेशे **उपैति, उपैधते** इति रूपं सम्पन्नम्। उप इतः इत्यत्र एजादिः इण्धातुः परत्र नास्ति इति कारणात् नात्रानेन वृद्धिः। अपि तु गुण एव उपेतः इति रूपं सम्पद्यते।

पररूपगुणापवादव्यवस्थापनम् – 'उप एति' इत्यत्र वा 'उप एधते' इत्यत्र वा अवर्णात् एच् परत्र अस्ति इति कारणदेव **वृद्धिरेचि** इति सूत्रेणैव वृद्धौ कृतायां उपैति, उपैधते इति इष्टरूपसिद्ध्या सूत्रे अस्मिन् एत्येधत्योः ग्रहणं मास्तु इति आक्षेपः। 'आदेचि परे वृद्धिरेकादेशो विधीयते वृद्धिरेचि इति सूत्रेण'। 'अवर्णान्तात् उपसर्गात् एङादौ धातौ परे पररूपमेकादेशः विधीयते एङि पररूपम्[9]' इति सूत्रेण। यदि सूत्रेऽस्मिन् एत्येधत्योः ग्रहणं न स्यात् तर्हि उप एति, उप एधते इत्यादौ अवर्णान्तात् उपसर्गात् परत्र एङादिधातोः सत्त्वात्, एङि पररूपम् इति सूत्रेण पररूपं स्यात् वृद्धिरेचि इति सूत्रेण प्राप्तां वृद्धिं बाधित्वा। एवं सति उपैति, उपैधते इति अभीष्टरूपसिद्धिः न स्यात्। एत्येधत्यूठ्सु इति सूत्रे रचिते तु अवर्णात् इण्धातोः, एधधातोश्च परत्र सत्त्वात् परमपि पररूपं बाधित्वा अनेन सूत्रेण वृद्धिः भवति। एतावता न पररूपविधायकशास्त्रस्य एङि पररूपम् इत्यस्य वैयर्थ्यम्। इण्धात्वेधधातुव्यतिरिक्ते एङादौ धातौ परे पररूपस्य प्रवृत्तिः भवति। एवञ्च तस्य उदाहरणं तु - प्र एजते, उप ओषति इत्यत्र इण्धात्वेधधातुव्यतिरिक्तधातोः अवर्णान्तात् उपसर्गात् परत्र सत्त्वात् तत्र पररूपे कृते प्रेजते, उपोषति इति अभीष्टं सिद्ध्यति। तथा च एत्येधत्योः ग्रहणं पररूपबाधनाय आवश्यकमेव।

गुणापवादव्यवस्थापनम् - ऊठ्ग्रहणं मास्तु इति आक्षेपः क्रियते। विनापि ऊठ्ग्रहणं **प्रष्ठौहः** इत्यादीनां रूपाणां सिद्धिः भवति। तत्कथमिति चेदुच्यते – 'प्रष्ठं वहति' इत्यर्थे वहश्च[10] इति सूत्रेण वह्धातोः ण्विप्रत्ययो भवति। 'प्रष्ठ अम् वह् ण्वि' इति स्थिते उपधावृद्धौ, ण्विप्रत्ययलोपे, उपपदसमासे, सुब्लुकि, प्रष्ठवाह् इति प्रातिपदिकं सिद्ध्यति। अस्मात् **प्रष्ठवाह्** इति प्रातिपदिकात् द्वितीयाबहुवचनविवक्षायां शसि, अनुबन्धलोपे, 'प्रष्ठवाह् अस्' इति जाते भस्य वाहः संप्रसारणमूठ् स्यात् इत्यर्थकेन वाह ऊठ् इति सूत्रेण संप्रसारणत्वेन वस्य ऊठादेशे, 'प्रष्ठ ऊ आह् अस्' इति जाते, पूर्वरूपे, 'प्रष्ठ ऊह् अस्' इति जाते, एत्येधत्यूठ्सु इति सूत्रेण अवर्णात् ऊठ्परकत्वात् वृद्धौ प्रष्ठौहस् इति जाते रुत्वे विसर्गे च कृते **प्रष्ठौहः** इति रूपं सिद्ध्यति। परन्तु 'प्रष्ठ वाह् अस्' इत्यवस्थायां **वाह ऊठ्**[11] इति सूत्रेण संप्रसारणत्वेन ऊठ् मास्तु, ह्रस्वः उकारः संप्रसारणसंज्ञक एव विधीयताम्। ततः परं पूर्वरूपे प्रष्ठ उद् अस् इति यदा स्थितिः भवति, तदा लुप्तं ण्विप्रत्ययं प्रत्ययलोपे प्रत्ययलक्षणम् इति सूत्रेण प्रत्ययलक्षणेन सम्पाद्य, उकारस्य आर्धधातुकं ण्विप्रत्ययं निमित्तीकृत्य **पुगन्तलघूपधस्य च**[12] इति सूत्रेण गुणे 'प्रष्ठ ओह् अस्' इति जाते, वृद्धिरेचि इति सूत्रेण वृद्धौ 'प्रष्ठौहः' इति रूपसिद्ध्या एत्येधत्यूठ्सु इति सूत्रे च 'ऊठ्ग्रहणं' मास्तु इति आक्षेपः। तस्य समाधानं तु - पूर्वोक्तरीत्यैव प्रष्ठौहः इति रूपसिद्धिः उभयोः सूत्रयोः ऊठ्ग्रहणं विनैव भवति इति ऊठ्ग्रहणं व्यर्थं सत् **'असिद्धं बहिरङ्गमन्तरङ्गे'**[13] इति परिभाषां ज्ञापयति। गुणः अन्तरङ्गः, तन्निमित्तकण्विप्रत्ययस्य कृतावेव अन्तर्भावात्। संप्रसारणं तु प्रकृत्यपेक्षया बहिर्भूतशस्प्रत्यय-निमित्तकत्वेन बहिरङ्गम्। अतः अन्तरङ्गे गुणे कर्तव्ये बहिरङ्गस्य संप्रसारणसंज्ञकस्य उकारस्य असिद्धं बहिरङ्गम् अन्तरङ्गे इति परिभाषया असिद्धत्वात् नात्र लघूपधगुणस्य प्रसक्तिः। अतः नापि वृद्ध्या प्रष्ठौहः इति रूपसिद्धिः। अतः वाह ऊठ् इति सूत्रेण ऊठादेशं संप्रसारणत्वेन विधाय तस्मिन् परे गुणस्य प्राप्त्या, गुणबाधनाय एत्येधत्यूठ्सु सूत्रे वृद्धिसंपादनाय ऊठ्ग्रहणं कृतम्। एवञ्च एत्येधत्यूठ्सु इति सूत्रम् एत्येधत्योः विषये **पररूपबाधनाय** ऊठ्विषये **गुणबाधनाय** च आवश्यकमेव।

एजादित्वस्य एत्येधत्योः विशेषणत्वव्यवस्थापनम् – न्यायः – **'संभवव्यभिचाराभ्यां स्याद् विशेषणमर्थवत्'** यद् वस्तु नाना प्रकारेषु वर्तते, तस्य वस्तुनः एकविधस्य क्रियायामन्वयाय, इतरेषाम् अन्वयवारणाय विशेषणवाचकस्य प्रयोगः सार्थकः भवति इति अस्य न्यायस्य अर्थः। जलं, शीतम् उष्णञ्च भवति इति जले वैविध्यं दृश्यते। तत्र उष्णं जलमानय इति कथिते शीतजलस्य क्रियायाम् अन्वयव्यावृत्तिः भवति। एवमेव शीतं जलमानय इति कथिते तु उष्णजलस्य क्रियायामन्वयव्यावृत्तिः इति तत्र विशेषणप्रयोगः इतरव्यावर्तनाय सार्थकः दृश्यते। एवं वह्नौ तादृशवैविध्यस्य अदर्शनात्, व्यावर्तनाय अत्र वस्तुनः तद्प्रकारतापन्नस्य असत्त्वात् न तत्र शीतं वह्निमानय इति वा उष्णं वह्निमानय इति वा विशेषणवाचकस्य प्रयोगः दृश्यते। एवमेव प्रकृते एजादौ इण्धातौ परे वृद्धिः इति कथनेन उप एति इत्यत्र वृद्धिः सिद्ध्यति। अनेजादौ इण्धातौ परे न वृद्धिः। उप इतः इत्यत्र तु गुण एव। एवञ्च एजादित्वस्य इण्धातौ संभवः व्यभिचारश्च वर्तते। एजादित्वा-भावस्थले तस्य धातोः वृद्धिवारणाय एचि इति तद्विशेषणोपादानं सार्थकं दृश्यते। एधधातुश्च सर्वदा सर्वत्र एजादिः एव। एजादित्वस्य तस्मिन् धातौ अव्यभिचारात्, वृद्धिवारणावश्यकतायाः अत्र धातोः अनपेक्षितत्वात्, एजादित्वं न एधधातोः विशेषणम् इति प्राञ्चः।

कैयटस्तु एधतेरपि विशेषणम् इति अभिप्रैति। एवं सति एधधातोः एजादित्वं कुत्र व्यभिचरति इति प्रश्नः मनसि उदेति। तदेतत् कथयति - एधधातोः णिचि लुङि माशब्दयोगे न माङ्योगे इति सूत्रेण आडागमाभावपक्षे इदिधत् इति रूपम्। तत्र एजादित्वस्य व्यभिचारः दृश्यते। एतदपि माशब्दयोगे एव, तदानीमेव आडागमाभावात्। अन्यथा आडागमे कृते, आटश्च इति सूत्रेण वृद्धौ ऐदिधत् रूपापत्त्या न तत्रापि एजादित्वस्य व्यभिचारः। एवञ्च पूर्वोक्तस्थले वृद्धिवारणाय एचि इति एध्-धातोरपि विशेषणम् इति अङ्गीकर्तव्यमेव इति कैयटः अभिप्रैति। एध् इत्यस्मात् णिचि ततः लुङि तिपि लुङः निमित्तीकृत्य च्लिप्रत्यये कृते, च्लेः चङादेशे एध् इ इ ति इति जाते, इतश्च इति इकारलोपे एध् इ अ त् इति जाते, णौ चङ्युपधायाः ह्रस्वः इति सूत्रेण एकारस्य ह्रस्वेन इकारे नायम् एधधातुः इति आशङ्का न कार्या। एकदेशेन विकृतेऽपि न तत्त्वपरित्यागः, एकदेशविकृतस्यानन्यत्वात्। पुनरत्राक्षेपो जायते यत् अत्र अजादेर्द्वितीयस्य इति सूत्रेण धिशब्दस्य स्थाने धिधिशब्दादेशे, युष्मदस्मदोः षष्ठ्यन्तबहुवचने वस्नसोः प्रवृत्त्यनन्तरं तत्र यथा प्रकृतिप्रत्ययविभागः कर्तुमशक्यः तथा अत्रापि धिशब्दस्य स्थाने धिधिशब्दादेशे, एध्-धातोः णिचश्च पृथक् विभागकरणस्य अशक्यत्वात्, एध्-धातुः अत्र वर्तते इति प्रतिपादयितुं न शक्यते इति पुनरत्र वृद्धेः प्राप्तिरेव नेति तत्र वृद्धिवारणाय एचि इति एधतेः विशेषणत्वेन च अङ्गीकारः अनावश्यकः इति। तन्न। धिशब्दस्य स्थाने धिधिशब्दादेशो नात्र। **द्विः प्रयोगो द्विर्वचनं** षाष्ठम् इति षाष्ठभाष्ये सिद्धान्तितम्। तेनात्र प्रकृतिप्रत्ययविभागः संभवति। अन्यथा अत्रैव णेरनिटि[14] इति सूत्रेण णिलोपः न स्यात्। पुनरत्र प्रश्नः उदेति – एध्-धातोः णिजन्तात् लुङि अत्र इदिधत् इति रूपमेव न सिद्ध्यति। यतः चङ्परकणिचं निमित्तीकृत्य प्रवर्तमानः णौ चङ्युपधायाः ह्रस्वः[15] इति सूत्रविहितः ह्रस्वः बहिरङ्गः, चङ्निमित्तकं द्वित्वं चङि इति सूत्रविहितमन्तरङ्गं भवति। अतः अन्तरङ्गशास्त्रस्य प्रथमप्रवृत्तिबोधनात् आदौ द्वित्वे कृते, ततः परं ह्रस्वे, इदिधत् इति रूपस्य सिद्धिरेव न इति। तदपि न। बहिरङ्गोऽपि ह्रस्वः, अन्तरङ्गं द्वित्वं बाधित्वा पूर्वं प्रवर्तते। अयं विषयः ओणृधातोः ऋदित्करणेन ज्ञाप्यते। ओणृधातोः ऋदित्वं नाग्लोपिशास्वृदिताम्[16] इति सूत्रेण उपधायाः ह्रस्वप्रतिषेधाय, येन ह्रस्वप्रतिषेधेन अभ्यासे ओकारः श्रूयेत। मा औनिनत् इत्यत्र अभ्यासे ओकारः श्रूयते। परन्तु यदि बहिरङ्गत्वात् ह्रस्वप्रवृत्तेः पूर्वं यदि द्वित्वं, द्वित्वोत्तरं उपधायां दीर्घस्यैव अभावात्, ह्रस्वप्रसक्तेः असंभवात् मा औनिनत् इति रूपे सिद्धे उपधाह्रस्वप्रतिषेधः व्यर्थः भवति। व्यर्थं सत् बहिरङ्गस्यापि उपधाह्रस्वस्य प्रथमप्रवृत्तिं बोधयति। यदि ह्रस्वः पूर्वं प्रवर्तेत, ततः परं द्वित्वे, तर्हि अभ्यासे ओकारः न श्रूयेत, अपि तु उकारः श्रूयेत। ततः तद्वारणाय ओणृधातोः ऋदित्करणं, तेन नाग्लोपिशास्वृदिताम् इति सूत्रेण ह्रस्वप्रतिषेधः स्यात्। एवं च एधधातोः णिचि लुङि माङ्शब्दयोगे आडागमाभावे इदिधत् इति रूपं भवत्येव। तत्र वृद्धिवारणाय एचि इति एधधातोश्च विशेषणम् इत्येव वक्तव्यम्। एचि इति अर्थात् एजादित्वम् ऊठश्च विशेषणं भवितुमर्हति इति अत्र आक्षिपति। आङ्पूर्वक अव् धातोः क्विपि, च्छ्वोः शूडनुनासिके च इति सूत्रेण अवधातोः वकारस्य ऊठादेशे, वृद्धौ च औः इति रूपम्। आ अ ऊ क्विप् इति जाते, क्विपः निवृत्तौ, अकारस्य ऊकारस्य च गुणे आ ओ इति जायते। अत्र पूर्वान्तवद्भावेन ऊठ्त्वात्, अस्यामवस्थायां तस्य एजादित्वस्य संभवः अस्त्येव। अतः एजादित्वं ऊठश्च विशेषणमेव इति चेत् - तन्न। एतादृशानां लक्ष्याणामनभिधानमेव बोध्यम्।

माधवमतनिरूपणम् - एवञ्च एजादित्वम् एत्येधत्योः विशेषणं न तु ऊठः इति दीक्षितः। एतद्विरुद्धं माधवमतमत्र अनूद्य तत्खण्डयति ग्रन्थकारः। तत्रादौ माधवमतं निरूप्यते - मा भवान् प्रेदिधत् इत्यत्र नातिप्रसङ्गः। ण्यन्तस्य णिजन्तधातोः, केवलात् धातोः भिन्नत्वात्, केवलेन धातुना णिजन्तस्य ग्रहणं न भवति। एवञ्च एत्येधत्यूठ्सु इति सूत्रे केवलम् एधतेः ग्रहणात्, कृतणिचः एधधातोः तेन ग्रहणं न भवति। अत्र णिजन्तस्थले वृद्धेः प्राप्तिरेव न इति माधवः अभिप्रैति। केवलेन धातुना णिजन्तस्य धातोः ग्रहणं न इत्यत्र प्रमाणञ्च प्रदर्शयति - न भाभूपूकमिगमिप्यायीवेपाम्[17] इत्यत्र आरब्धं ण्यन्तानां च भादीनामुपसंख्यानम् इति वार्त्तिकमेव प्रमाणं केवलेन धातुना न ण्याधिकस्य ग्रहणमिति। न भाभूपूकमिगमिप्यायीवेपाम् इति सूत्रेण एतेभ्यः धातुभ्यः परस्य कृन्नस्य णत्वं निषिध्यते। तत्र ण्यन्तस्थलेऽपि अयं निषेधः वक्तव्यः इति वार्त्तिकेन चोद्यते। केवलेन ण्यधिकस्यापि ग्रहणे ण्यन्तस्थलेऽपि सूत्रेणैव निषेधसिद्ध्या वार्त्तिकं व्यर्थं सत् केवलेन न ण्याधिकस्य ग्रहणम् इति बोधयति। अपि च द्वितीयं प्रमाणं कथयति – उपसर्गात् सुनोतिसुवतिस्यतिस्तौतिस्तोभतिस्थासेनय-सिचसञ्जस्वञ्जाम् इति हि सूत्रम्। अनेन सूत्रेण उपसर्गस्थात् निमित्तात् परेषां एतेषां धातूनां सस्य षत्वं विधीयते। तत्र भाष्ये अभिषावयति इति उदाहृतम्। तत्र प्रश्नः कृतः - अभेः (अभि इत्युपसर्गस्य) सुनोतिना सह संबन्धात् सुनोतेरेव सस्य षत्वं स्यात्, अभिषावयति इत्यत्र कथं षत्वम् इति प्रश्नः कृतः। तस्य समाधानं भाष्यकारेण इत्थमुक्तम् - अभि इत्युपसर्गस्य सुनोतिं प्रत्ययेव अन्वयः, न तु सावि इति ण्यन्ते। अतः सुनोतिनैव सह प्रति उपसर्गत्वात् अभेः, तन्निमित्तकषत्वसिद्धौ न किञ्चिद् बाधकमिति। आभ्यां प्रश्नसमाधानाभ्यां स्पष्टं प्रतीयते न केवलेन धातुना ण्यधिकस्य ग्रहणम् इति। सुनोतेः विहितं षत्वं सावेः कथम् इति प्रश्नेन प्रतीयते केवलेन ण्यधिकस्य ग्रहणं नास्ति इति। अस्तु प्रश्नः कदाचित् केवलेन ण्यधिकस्य ग्रहणं भवति इति अज्ञात्वा कृतः स्यात्। समाधानं किं वक्तव्यमासीत् - आम्, केवलेन ण्यधिकस्य ग्रहणं भवति, अतः सुनोतेः विहितं षत्वं सावि इत्यत्रापि प्रवर्तते एव इति वक्तव्यम्। परन्तु समाधानं तथा नोक्तम्; अभेः केवलेन धातुना संबन्धं प्रतिपाद्य षत्वं साधितम्। एवञ्च आभ्यां प्रश्नसमाधानाभ्याञ्च अयं विषयः स्पष्टतामेति केवलेन न ण्याधिकस्य ग्रहणमिति। आभ्यां द्वाभ्यां प्रमाणाभ्यां केवलेन ण्याधिकस्य ग्रहणं नास्ति इति व्यवस्थाप्य

एधतिना च कृतणिचः एधतेः ग्रहणाभावात् न प्रेदिधत् इत्यत्र अतिप्रसङ्गः इति प्रतिपादितं माधवेन। तत्र केवलेन ण्यधिकस्य ग्रहणे प्रमाणे प्रदर्शिते तस्य च खण्डनमकरोत् माधवः। तद्धि - हेरचङि इति सूत्रम्। अभ्यासात्परस्य हिनोतेः हस्य कुत्वं स्यात् न तु चङि इति तदर्थः। चङ् तु णिजन्तात् लुङि परे भवति। केवलस्य विहितं कुत्वं, णिजन्तस्थले चङि परे कथं स्यात् यदि केवलेन ण्याधिकस्य ग्रहणाभावे? अतः चङि परे हिनोतेः विधीयमानकुत्वनिषेध एव अत्र केवलेन ण्याधिकस्य ग्रहणे प्रमाणम् इति आक्षिप्तम्। तत्र माधवः समादधाति - तच्च ज्ञापकं कुत्वमात्रविषयकम्। कुत्वविधायकस्थले केवलेन ण्याधिकस्य ग्रहणे प्रमाणं स्यात्, न तु सर्वत्र इति। अत एव वार्त्तिकमिदं सङ्गच्छते - हेश्चङि प्रतिषेधानर्थक्यम् अङ्गान्यत्वात्। ज्ञापकं तु चङः अन्यत्र ण्यन्तेऽपि कुत्वाभावस्य इति माधवेन तत्प्रमाणं विघटितम्। तथा च पूर्वोक्तवत् केवलेन ण्याधिकस्य अग्रहणात् प्रेदिधत् इत्यत्र च नातिप्रसक्तिः इति।

माधवमतखण्डनम् - अत्र दीक्षितः माधवोक्तिं खण्डयति — केवलः धातुः भिन्नः स्यात्, णिज्विशिष्टः भिन्नः स्यात्। उभयोः भिन्नत्वेऽपि शब्दान्तरत्वेऽपि धातोः णिचि कृते प्रकृतिभागस्य तत्रोपलब्धिः भवत्येव। न स अंशः व्यपगच्छति। अतः एध्धातोः णिचि प्रकृतिभागस्य एध्रूपत्वं न व्यपगतम्। अतः एध्धातोः परत्र सत्त्वात् प्रेदिधत् इत्यत्र च एजादित्वविशेषणाभावे अतिप्रसङ्गः स्यात्। प्रकृत्यंशे तद्धातुत्वं न हीयते इति तत्रापि प्राप्तिरस्ति इत्येवार्थः। अभिषावयति इत्यत्र च सुनोतेः प्रकृत्यंशस्य अनपायात् षत्वस्य प्राप्तिरस्ति तत्र। तद्भाष्यं च एतत्सन्दर्भ एव प्रमाणम्, न तु केवलेन ण्याधिकस्य अग्रहणे। अत एव तत्र सूत्रे वार्त्तिककृता उक्तं सिद्धं तु अवयवानन्यत्वात् इति। अवयवः तत्र प्रकृत्यंशः धातुं न भिद्यते, अतः षत्वं प्रवर्तते एव इति तदर्थः। इत्थं द्वितीयं प्रमाणं खण्डितम्। प्रथमस्य प्रमाणस्य खण्डनम् इत्थम् - विशिष्टस्य शब्दान्तरत्वेऽपि, धातोः णिचि कृते, प्रकृतिभूतस्य धातोः कृत्प्रत्ययस्य च णिचा व्यवधानात् कृतः नस्य णत्वेऽप्राप्ते, णत्वसंपादनाय वार्त्तिकं तत् सङ्गच्छते। एवञ्च तद्वार्त्तिकमपि णिज्विशिष्टस्थले प्रकृत्यंशस्य सत्त्वप्रतिपादकमेव इति ग्राह्यम्, न तु केवले ण्याधिकस्य अग्रहणे। एवञ्च प्रेदिधत् इति लक्ष्ये, एचि इति एत्येधत्योः विशेषणाभावे अतिप्रसङ्गः स्यादेव, तद्वारणाय एचि इति तद्विशेषणम् इत्येव स्वीकार्यम् इति दीक्षितः स्वमतं व्यवस्थापयति।

निष्कर्षः – एत्येधत्यूठ्सु इति हि सूत्रम्। अवर्णात् एजादौ इण् धातौ परे, एधधातौ परे, ऊठि च परे पूर्वपरयोः वृद्धिरेकादेशः स्यात् इति अस्य सूत्रस्यार्थः। उप एति इत्यत्र अथवा उप एधते इत्यत्र वा अवर्णात् एजादिः इण्धातुः, एजादिः एधधातुश्च परत्र अस्ति इति कारणात् पूर्वपरयोः स्थाने वृद्धिरेकादेशे उपैति, उपैधते इति रूपं सम्पन्नम्। उप इतः इत्यत्र एजादिः इण्धातुः परत्र नास्ति इति कारणात् नात्रानेन वृद्धिः। अपि तु गुण एव उपेतः इति रूपं सम्पद्यते। उप एति, उप एधते इत्यादौ पररूपबाधनार्थम् इदं सूत्रमारब्धम्। ऊठि गुणबाधनार्थञ्च। एजादित्वम् एधतेरपि विशेषणम्। तस्य णिचि लुङि एजादित्वस्य व्यभिचारात्। तन्न इति अत्र माधवः। तन्निरूपणं तत्खण्डनञ्च अत्र कृतं विद्यते।

सन्दर्भग्रन्थसूची

१. शर्मणागिरिधरः शर्मणापरमेश्वरानन्दः, (२००४), वैयाकरण-सिद्धान्तकौमुदी प्रथमभागः, भट्टोजिदीक्षितविरचिता, बालमनोर-मातत्त्वबोधिनीव्याख्याद्वयोपेता,वाराणसी, मोतीलाल बनारसी दास।

२. दीक्षितः, (२००३), प्रौढमनोरमा शब्दरत्न-भैरवी-भावप्रकाश-सरलाव्याख्याभिः संवलिता, वाराणसी,चौखम्भा संस्कृत संस्थान।

३.श्रीपादसत्यानारायण,(२००१), लघुशब्देन्दुशेखरव्याख्याश्रीबाल-बोधिनीसंवलितः पञ्चसन्ध्यन्तः भागः, तिरुपतिः, राष्ट्रियसंस्कृत-विद्यापीठम्।

४. भट्टनागेशः, (२००१), लघुशब्देन्दुशेखरस्य चन्द्रिकाव्याख्यायुतः, प्रथमभागः, वाराणसी,चौखम्भा संस्कृत-संस्थानम्।

५. जयादित्यवामनः, (१९८५), काशिकावृत्तिः न्यासपदमञ्जरी-सहिता, वाराणसी, रत्ना पब्लिकेशन्स्।

६. व्याकरणमहाभाष्यम्, श्रीमन्महर्षिपतञ्जलिविनिर्मितम्।

पाद टिप्पणी

[1]वाक्यपदीयम् – 1.5

[2]वाक्यपदीयम् – 1.16

[3]महाभाष्यं पस्पशाह्निकम्

[4]आद्गुणः (६.१.८७) - अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात्संहितायाम् ।

[5]वृद्धिरेचि (६.१.८८)- आदेचि परे वृद्धिरेकादेशः स्यात्। गुणापवादः।

[6]एकः पूर्वपरयोः (६.१.८४) - इत्यधिकृत्य ॥

[7]इक्श्तिपौ धातुनिर्देशे – वार्तिकम्। रोगाख्यायां ण्वुल् बहुलम् इति सूत्रे।

[8]परिभाषेन्दुशेखरः – परिभाषासङ्ख्या - ३३

[9]एङि पररूपम् (६.१.९४) - आदुपसर्गादेङादौ धातौ परे पररूप-मेकादेशः स्यात्। प्रेजते।

[10]वहश्च (३.२.६४) - वहेर्धातोश्छन्दसि विषये सुबन्त उपपदे ण्विप्रत्ययो भवति।

[11]वाह ऊठ् (६.४.१३२) - भस्य वाहः संप्रसारणमूठ् स्यात् ॥

[12]पुगन्तलघूपधस्य च(७.३.८६) - पुगन्तस्य लघूपधस्य चाङ्गस्येको गुणः स्यात्सार्वधातुकार्धधातुकयोः।

[13]परिभाषेन्दुशेखरः – परिभाषासङ्ख्या - 50

[14]णेरनिटि (६.४.५१) - अनिडादावार्धधातुकेपरे णेर्लोपः स्यात्।

[15]णौ चङ्युपधायाः ह्रस्वः (७.४.१) - चङ्परे णौ यदङ्गं तस्योपधाया ह्रस्वः स्यात्॥

[16]नाग्लोपिशास्वृदिताम् (७.४.२) - णिच्यग्लोपिनः शास्तेर्ऋदितां च उपधाया ह्रस्वो न स्याच्चङ्परे णौ।

[17]न भाभूपूकमिगमिप्यायीवेपाम् (८.४.३४) - एभ्यः कृन्नस्य णो न। प्रभानीय